Bodleian Libraries
UNIVERSITY OF OXFORD

This book is part of the collection held by the Bodleian Libraries
and scanned by Google, Inc. for the Google Books Library Project.

For more information see:

http://www.bodleian.ox.ac.uk/dbooks

This work is licensed under a Creative Commons Attribution-NonCommercial-ShareAlike 2.0 UK: England & Wales (CC BY-NC-SA 2.0) licence.

Hindi Harsh 1

13.D.81.

Indian Institute, Oxford.

The Lucknow Sparks Library.

Presented

by

Munshi Newul Kishore.

Tulasītattva-bhāskara. (Sanskrit)

also Tilakatattvabhāskara and Vaiṣṇavatattvabhāskara

Hariharaprasāda

# तुलसी तत्त्व भास्कर

تلسی تت بھاسکر

## जिसमें

प्रथम भाग तुलसी तत्त्व भास्कर में तुलसी माहात्म्य पूजन ध्यानादि और द्वितीय भाग तिलक तत्त्व भास्कर में तिलक वर्णन और तृतीय भाग वैष्णव तत्त्व भास्कर में वैष्णव माहात्म्य वर्णित है उसी को सीता राम कृपा पात्र सीता रामीय परम हंस परिव्राज काचार्य्य हरि हर प्रसाद ने

निर्म्माण किया

स्थान लखनऊ

मुन्शी नवलकिशोर के छापेखाने में छपा॥

सितम्बर सन् १८८० ई०

تلسی تت بھاسکر

श्रीगणेशायनमः

# तुलसीतत्त्वभास्कर

## श्लोक

वज्रांगंवज्रदंष्टं खल दव दहनं कोटि सूर्य्य प्रकाशं
रुद्रं ब्रह्मादिसेव्यं दशमुख भयदं कांचनाभं कपीशम
पिंगाक्षं पीत वस्त्रं पवन समजवं रामदूतं प्रसन्नम लंका
वंक प्रदंतं कपि कुलतिलकं वातजातं नमामि ॥ सीतापते
शरंनत्वा शार्ङ्गं चापि शरासनम कुर्वे वैष्णव तुस्यर्थं तु-
लसीतत्वभास्करम ॥

श्रीमत्परमहंसपरिव्राजकाचार्य्यतारक ब्रह्मानंद सरस्वतीपंडि-
तस्वामि शिष्य विशुद्धानंदसरस्वती स्वामिनांसं मतो ऽयमर्थः१
श्रीमत्परमहंसपरिव्राजका चार्यतारक ब्रह्मानन्द सरस्वतीपं-
डितस्वामिशिष्य विश्वरूप स्वामिना सम्मतो ऽयमर्थः २ तर्कपं-
चाननो पनाम कानांश्रीजयनारायण शर्म्मणां सम्मत मिदं३।
अत्रार्थे श्री विश्वेश्वर दत्त शर्म्मणः सम्मतिः ४ ॥ अर्थो ऽयं स-
म्मतो विद्वच्चंद्र शेखर शर्म्मणः ५ ॥ मन्यते ऽमुमर्थं देव दत्तश-
र्म्मासुधीः ६ ॥ वैष्णवैर्नित्यं तुलसीमाला धार्य्यै वेत्यत्र सम्मतिः
सखाराम भट्टानाम ७ ॥ सदातुलसी काष्ठमालधारणं द्विवेदाः

नामक पण्डित रक्षपाल शर्म्मणः सम्मतिः ८॥ सम्मतिरत्र श्री मत्त्रिवेणीनिवासिशिवसहाय शर्म्मणः ९॥ कृतसम्मतिकोऽत्र द्विवेद बस्तीराम शर्म्मा १०॥ वैष्णवागमोक्तदीक्षावद्भिर्भी ज्जनादि सर्वकालेपि तुलसीमाला धार्य्यैवनत्याज्येत्यत्र सम्मतीराजाराम शास्त्रिशर्म्मणः ११ वैष्णवागमोक्तदीक्षावद्भिर्भोज्जनादिसर्वकालेपि तुलसीमाला धार्य्यैवनत्याज्येत्यत्र सम्मतिर्बाल शास्त्रिणः १२ एवं बापूदेव शास्त्रिणोऽपि सम्मतिः १३ एवं पंडित यागेश्वर शर्म्मणोऽपि संमत्तिः १४॥ गोविन्द देव शास्त्रिणश्च ॥१५॥ वैष्णवैर्नित्यं तुलसीमाला धार्य्येत्यत्र सम्मतिरनंत रामभट्टानाम ॥१६ सममान्य यमर्थं स्सु कुलोपपद श्रीधर शर्म्म पण्डितेः १७॥ इम मर्थं संमनुत्ते श्रीपण्डित माध्वमतानुयायि माधवाचार्यः १८॥ अत्रार्थे संमतिर्वामनाचार्य्याणाम १९॥

अथ तुलसी माला धारणविधिः हरिभक्तिविलासे श्रीमद्गोपाल भट्टोदाहृत गरुड़ पुराण वचनानि॥ संनिवेद्यैव हरये तुलसी काष्ठसंभवाम्॥ मालांपश्चात्स्वयंधत्ते सवै भागवतोत्तमः॥ हरयेनार्पयेद्यस्तु तुलसीकाष्ठ संभवाम मालांधत्ते स्वयंमूढ़ः सयात्ति नरकं ध्रुवम॥

कृतसम्मतिरत्रांविकादत्त शर्म्मा २०॥ सम्मतिरत्रार्थे श्रीराधामोहनदेवशर्म्मणाम २१॥ सम्मतिरत्रार्थे कालीप्रसाद शर्म्मणाम २२॥ सम्मतिरत्रार्थे हरिकृष्ण शर्म्मणः २३ सममंस्तामुमर्थं द्विवेदोपाह्व भैरवदत्त शर्म्मा २४॥ सममान्य यमर्थो द्विवेदोपाह्व हरदत्त शर्म पण्डितेन २५ सम्मतिरत्रार्थे देवधरोपाह्व नारायण शर्म्मणः २६॥ सदातुलसी काष्ठमाला धारणेगोपाल शा-

 ۴ تلسی تت بھاسکر

र्म्मरणः २७॥ संमत्तिरत्रार्थे वास्करोपाहू कृष्णशर्म शास्त्रिणः ॥ २८॥ अत्रार्थे विराट्क्षेत्र वासिन्सयाचित्तोपाहू दीक्षित-यज्ञेश्वर शर्म्मणः २९ सम्मतिरत्रगरोशास्त्रीतिनः ३०॥ सम्मतिरत्रराम चंद्र शास्त्रिणः ३१ सम्मतिरत्र घनश्याम शर्म्मणः ३२ सम्मतिरत्रार्थे परिडतवेचनराम शर्म्मणः ३३ सम्मतिरत्र शीतलप्रसाद शर्म्मणः ३४ अत्रार्थे सम्मतिः श्रीविश्व नाथ शर्म्मणः ३५ सम्मतिरत्रार्थे श्रीकैलासनाथ शर्म्मणः ३६ अत्रार्थे कृतसम्मतिः श्री प्यारे शर्म्मा मिथिला धीशसम्मानितः ३७ सम्मतिरत्रार्थे देवकृष्ण शर्म्मणः ३८ सम्मतिरत्रहरिशरणशर्म्मणः ३९ सम्मतिरत्रार्थे श्रीश्रीपति शर्म्मणो वेतीयेश परिडतस्य ४० सम्मतोऽयमर्थो द्विवेदि श्री रमापति शर्म्मणः ४१ सम्मतिरत्रार्थे विद्याधर व्यासस्य ४२ सम्मतिरत्रार्थे व्यासोपनाम कस्यपरमेश्वर दत्त शर्म्मणः ४३ सम्मतिरत्रार्थे वलदेव शर्म्मणः ४४ कृतसम्मतिः कोऽत्रपांडेयोपाहू जानकी प्रसाद शर्म्मा ॥ ४५॥

क्षालितां पंच गव्येन मूलमंत्रेण मंत्रिताम ॥ गायत्र्या चाष्ट कृत्वो वै मंत्रितां धूपयेच्चताम विधिवत्परया भक्त्या सद्यो जातेन पूजयेत ॥ तुलसीकाष्ठ संभूते मालकृष्ण जनप्रिये ॥ विभर्मित्वा महंकंठे कुरुमां राम वल्लभम ॥ यथात्वं वल्लभा विष्णोर्नित्यं विस्नुजनप्रिया ॥ तथा मां कुरु देवेशि नित्यं विस्नु जनप्रियम ॥ दानेलाधातु रुद्रिष्टो लासिमांहरि वल्लभे ॥ भक्तेभ्यश्च समस्तेभ्य स्तेनमाला निगद्यते ॥ एवं संप्राप्य विधिवन्मालां रामगलेर्पिताम ॥ धारये द्वै सदा योवै सगच्छे

द्वैस्मवं पत्नम ॥ अथमाला धारण माहात्म्यं तत्रैवस्कान्दे ॥
धात्री फल कृतामाला तुलसीकाष्ठ सम्भवा ॥ दृश्यत्तेयस्यदे-
हे तुसवै भागव तोत्तमः ॥ तुलसीदलजामालां कंठस्थांवहते
तुयः ॥ विष्णूत्तीर्णां विशेषेणासन मस्यादिवौकसाम् ॥ तुलसी
दलजामाला धात्रीफलकृतापिच ॥ ददातिपापिनां मुक्तिं
किंपुनर्विष्णुसे विनाम ॥ तत्रैवगारुडे ॥ तुलसी काष्ठ संभूतां
योमालांवहतेनरः प्रायश्चित्तं न तस्या स्तिनाशौचं तस्यवि-
ग्रहे ॥ तुलसीकाष्ठ माला भिर्भूषित्तो भ्रमतेयदि दुःस्वप्नं दुर्नि
मित्तं चनभयं शास्त्रजंक्कचित् श्रुतिप्रकाशि कोदाहृतेर्यज्ञो-
पवीतवद्धार्यासदा तुलसिमालिके त्यादिवचनैश्च तुलसी
मालायाः सर्वदाधारण मेवयुक्त मितिसिद्धान्तः ॥ यत्तुतुल-
सीनत्तिनाक्षकारेण ॥ तुलसीचयथा लक्ष्मीर्लक्ष्मीश्च तुल-
सीत्तथा ॥ नभेदोस्तित्तयोः कश्चि त्तस्मात्तत्वैव धारयेत् ॥
स्नानकालेयदाकंठे तुलसीदाम भूषितः ॥ तद्वारि पादोपत्त
त्तिस पापिष्ठान राधमइत्ति वृद्धशांडिल्य वचनम ॥ भोजने
शयने चैव मलमूत्र विसर्जने तुलसीकाष्ठ माला या धारण
स्यात्तितोभवेत् ॥ अरणयेलघुवाधायांमैथुने क्षौरकर्मणि ॥
तुलसीकर्णकंठस्य ब्रह्महत्यापदेपदे ॥ तुलसीं धारयन्कं-
ठे मलमूत्र विसर्जने ॥ नरकेपच्यते मूढो यमदण्डे नपीडितः
॥ तुलसीमालिका नित्यं धारणीया प्रयत्नतः ॥ धारयेच्च विशे-
षेण जप होमार्च्चनादिषु ॥ तुलसीं देवपूजायां जप काले

तथैवच ॥ पूजने स्मरणे चैव अन्य कालेन धारयेत इत्यादि वामन पुराण वचनानि ॥ पूजाकाले हरिध्याने संध्यायां वंदनेतथा ॥ तुलसी धार्यते कंठे महाभागवतोत्तमैरिति बृह द्भारद्वाज संहिता वचनंच ॥ तुलसी काष्ठ मालां यस्तु शौ चेच वहेन्नरः अवैष्णवः सविज्ञेयो महापातक वान्भवेदिति वृद्ध शाण्डिल्य वचनंच ॥ भोजने शयने चैव मलमूत्र विस र्जने ॥ तुलसी मालिकां धत्ते पतत्येव नसंशयः ॥ अरण्ये लघुबाधायां तैलाभ्यंगेच मैथुने ॥ तुलसी कण्ठे कंठेच ब्रह्म हत्यापदेपदे ॥ इति ब्रह्माण्ड पुराण वचनं चोपन्यस्य सर्वदा तुलसीमाला धारणस्य निषेध उक्तस्तन्न प्रामाणिक नि बंधेषु तेषामदर्शनेन ॥ तद्विरुद्ध वचनानां दर्शनेन चैते सांकल्पित त्वात ॥ तथाच हरि भक्ति विलासे श्रीमद्गोपा ल भट्ट माध्वोदा हृतम ॥ एकादशी तत्त्वे रघुनंदन भट्टा चार्य स्मार्तोदा हृतम जयसिंह कल्पद्रुमे जयसिंहोदा हृतं गरुड़ पुराणं वचनम ॥ स्कांद वचनंच ॥ तुलसीं विना या क्रियेत नपूजा स्नानं तच्च तुलसीं विना कृतं भुक्तं नतत् दत्तुलसी विवर्जितं पीतं नतच्च तुलसी विवर्जितम ॥ स्ना ने दाने तथा ध्याने प्राशने केशवार्चने तुलसी दहते पापं कीर्तने रोपणे कलौ ॥ तथाच श्रुति प्रकाशिका कोदाहृत स्कां द वचनम तुलसी काष्ठ मालांयो धृत्वा स्नानं समाचरेत ॥ पुष्करेच प्रयागे च स्नातं तेनमुनीश्वर ॥ तत्रैव पाद्म वचन

मपिस्नान काले तुयस्यांगे दृश्यते तुलसी शुभा ॥ गंगादि स-
र्वतीर्थेषु स्नातं तेनासंशयः ॥ अतएव गौरी तंत्रेऽपि ॥ स्ना-
नकालेच यस्यांगे दृश्यते तुलसी शुभा गंगादि सर्वती-
र्थेषु स्नानं तस्य न संशाय इत्यादितत्तु दाहृते ॥ स्नानका-
लेयदा कंठेइति श्लोके उक्तायुक्तिरपि विरुद्धा तथाहि ॥ य-
दितु तुलसीमाला स्यात्तत्र तस्यपाद पतना दोषः स्यात्त-
र्हिगंगादि स्नाने पितदोषप्रसंगः ॥ पादस्पर्श विनास्नानासं-
भवात् ॥ किंच सर्वदा विष्णुरूप तिलक धारण स्यापिनिर्वा-
होनदृश्यते ॥ स्नान काले तत्क्षालन जलस्यापि पादस्प-
र्शकर्तुं स्यात् ॥ अन्यथा तुलसीदल मिश्रितजलेनस्नान
विधेरप्य संभवः स्यात् ॥ पादस्पर्शभयात् ॥ तद्धि धिष्य दृश्य
ते रामार्चनचन्द्रिकायाम् स्नान प्रकरणे ॥ शालग्राम शि-
लात्तोयं तुलसीगंध मिश्रितं ॥ कृत्वाशंखं भ्रामयंश्चिःप्रक्षि
पेन्निजमूर्द्धनि ॥ तथाच हरिभक्ति विलासे ॥ श्री मद्गोपा-
ल भट्टोदाहृत पाद्मवचनं ॥ द्वारकाचक्र संयुक्त शालग्रा-
म शिलाजलं ॥ शंखेकृत्वातुनिःक्षिप्तं स्नानार्थं ताम्रभाज-
ने ॥ तुलसीदल संयुक्तं ब्रह्महत्या विनाशनं ॥ श्रुतिप्र-
काशिकोदाहृतस्कांद वचनंच ॥ तुलसी काष्ठमालां यो
धृत्वा भुंक्ते द्विजोत्तमः ॥ सिक्थेसिक्थे सलभते वाजिमेध
फलम्मुने ॥ तत्रैव गौरी तंत्रेपि ॥ तुलसी धारिणां विप्रयः
श्राद्धे भोजयेत्प्रिये ॥ तस्य तुष्यंत्ति पितरोमन्वं तरशताव-

धि॥तुलसीमालिकांधृत्वायो भुंक्ते गिरिनंदिनि॥सिक्थे सिक्थे सलभते वाजपेयशताधिकम्॥दीक्षानंतर मी-प्राणियो भुंक्ते तुलसींविना॥तदन्नंशूकरमलं तज्जलं सुरया समम्॥नैद्यगाकालनिय मोनस्थान नियमस्त-त्या॥विप्रातेपर्वत सुतेतुलसी मणिधारणो॥तत्रैवपाद्मे॥तुलसीमालिका न्धृत्वायोभुंक्ते गिरिनंदिनि॥सि-क्थे सिक्थे सलभते वाजपेयफलं शुभम्॥वहुनाकि मि होक्तेन श्रूयाण त्वंवर वर्णिनि॥विड्उत्सर्गादि काले न त्याज्यातुलसि मालिका॥अंतकालेपि यस्यांगं तुलसी मालिकास्पृष्टोत्॥तस्यदेहेद्भवं पापं तत्क्षणा देवन-श्यति॥यत्कंठे तुलसीनास्तिते नराभूदु मानसाः॥अन्नं विष्ठाजलं मूत्रं पीयूषं रुधिरं भवेत्॥ततस्सर्वेषु काले-सुधार्यो तुलसिमालिका॥क्षणार्द्धं तद्विहीनोपि वि-ष्णुद्रोही भवेन्नरः॥तत्रैवगारुडे॥प्रायश्चित्तं नतस्या स्ति नाशौचंतस्य विग्रहे॥तुलसीकाष्ठ संभूतं शिरोवा हु विभूषणम्॥तत्रैवस्कांदेपि॥यज्ञोपवीतवद्धार्या कंठे तुलसिमालिका॥नाशौचंधारणे तस्यात्र तस्मा ब्रह्म स्वरूपिणीति अयंभावः॥यथायज्ञोपवीत त्यागेन ब्रह्म कर्म विमुखत्वं तथा तस्याः क्षणमात्र त्यागेन भगव-द्विमुखत्वमिति॥अतएवगौरीतंत्रे॥यज्ञोपवीत वद्धा-र्यासदा तुलसिमालिका॥क्षणमात्रपरित्यागाद्विमु

द्रोही भवेन्नरः ॥ पुनस्तत्रैव नारदपंचरात्रेच ॥ अशौचेचा-
प्यनाचारे काले कालेच सर्वदा ॥ तुलसीमालिकां धत्ते
सयाति परमं पदमिति ॥ हरिभक्तिविलासे श्रीमद्गोपा-
लभट्टमाध्वोदाहृतं एकादशीतत्वे रघुनंदनभट्टाचार्य
स्मार्त्तोदाहृतं ॥ जयसिंहकल्पद्रुमे जयसिंहोदाहृतं ॥ ग
रुडपुराण पद्मपुराण वचनंच धारयंतिनयेमालां हैतु
काः पापबुद्धयः ॥ नरकान्न निवर्त्तन्ते दग्धाः कोपाग्निना
हरेः ॥ धात्रीफलकृतां मालां कंठस्थां यो वहेन्नरः ॥ वैष्ण
वोनसविज्ञेयो विष्णुपूजारतोयदि ॥ जयसिंहकल्पद्रु
मीय भक्तिपुराणस्थ वामनपुराण वचनंच ॥ पूजातु तु
लसीपत्रैर्मया कार्यासदैवहि ॥ तुलसीकाष्ठसंभूतामा
लाधार्यासदाहरेः ॥ स्मृतिप्रकाशिका सरोज सुन्दरोदा
हृतस्मृतिः ॥ तुलसीकाष्ठसंभूतां मालां यो वहते द्विजः
॥ शुचिर्वाप्यशुचिर्वापि ब्रह्मभूयान्न संशयः ॥ श्रीमद्गो-
पालभट्टोदाहृत विष्णुधर्मोत्तर वचनंच ॥ तुलसीकाष्ठ
मालांच कंठस्थांच हरेतु यः अप्यशौचोप्यनाचारो-
मामेवैतिन संशयः ॥ कल्परत्नावल्यां रामचंद्रभट्टेन
अनूपविलासे दीक्षित मणिरामेण विधान पारिजाते
प्रथमस्तवके अनंत भट्टेन हरिभक्तिविलासे श्रीमद्गो
पालभट्टेन हरिभक्तिभास्करे भुवनेश्वरदेवेन ॥ धर्मसा-
रे पुरुषोत्तमेन विष्णुधर्मोत्तरवचनं स्कांदवचनं चोदा-

हतं तथाहि ॥ माला युग्मंच यो नित्यं धात्री तुलसि संभवं ॥ वहते कंठदेशेच कल्पकोटि दिवंवसेत ॥ नजह्या तुलसी माला धात्रीमाला विशेषतः ॥ महापातकसंहर्त्री धर्मकामार्थ दायिनीम ॥ ननुमाला युग्मंच योनित्यमिति वचनं ॥ नजह्यात्तुलसी माला मितिवचनंच ॥ यज्ञोपवीत वद्धार्या सदातुलसि मालिकेत्तिवचनंच ॥ क्षणमात्र परित्यागाद्विष्णु द्रोही भवेन्नरइति वचनंच ॥ भोजनादि निषिद्ध काल भिन्नक्षण मात्र परित्यागात्प्र त्यवाय वोधकमि तिचेन्न ॥ भोजनादि काले तुलसी धारण निषेध कवच नानाम प्रमाणिक त्वात ॥ भोजनादि काले प्रामाणिक धारण वाधक वचनानां निर्विषय त्वापत्तेश्च ॥ यत्तुर्ये निवध्नंति तुलसीं कंठे ज्ञानविमोहिताः ॥ सर्वधर्म विनिर्मुक्तास्ते यांतियम सादनम् ॥ कंठेवध्वातु तुलसीं मिथ्याजल्पं तियेनराः ॥ तेसदापापि नोज्ञेया विष्णुधर्म वहिर्मुखाः ॥ इतिब्रह्मांडपुराण त्वेनप्रकल्पितं श्लोकः द्वयमुदाहृत्य तुलसीमाला धारणं निषिद्धमित्युक्तं तदसत प्रसिद्ध निवन्धेश्वदर्शनात ॥ तुलसीमाला रहित पुरुषस्य मिथ्या संभाषण विध्य श्रवणाच्च ॥ निवंधेषु यज्ञोपवीतवद्धार्या सदा तुलसि मालिके त्यादि तद्विरुद्ध वचनदर्शनाच्च ॥ येकराठलग्नतुलसी नलिनाक्षमाले त्यादि

तदुदाहृत वचनैर्विरोधाच्च ॥ नहि तुलसी मालायाः कं-
ठलग्नात्वंबंधन मंत्रतासंभवति नापिकंठे वटदुग्धा
दिलेपनपूर्वक तुलसी गुटिका विन्यासोऽवलोकितोले
के ॥ यत्तु तुलसी नत्तिनाक्षकारेण ॥ यतुवर्णावहि भूता
स्तेषांकी दृशिव धिर्मतः ॥ इदानीं श्रोतु मिच्छामि वदत्वं
कृपयाप्रभो ॥ इतिविहगेश्वर प्रश्नोपरि ॥ चक्रादि धार
णांतेषामपि तुल्यं खगेश्वरमंत्रेतु नाधिकारः स्याद्वैदि
के तांत्रिकेपिवा ॥ मन्नाममात्रंदातव्यं मंत्रोवा वैपरीत्य-
तः ॥ तेषांकंठेतु वध्नीयात्तुलसी काष्ठ मालिकाम ॥ मं-
त्रप्रतिष्ठितामाला तैर्नधार्या कदाचन ॥ अमंत्रपूता-
मालैवधार्या कंठेसदैव तैरिति विहगेश्वरसं हितावचन
मुपन्यस्य कंठलग्नमाला द्विजातीनां निषिद्धाद् तिद
र्शितंतत्र ॥ प्रामाणिक निबंधेषु तद्वचनानाम दर्शनेन
तादृश निषेधस्य अप्रामाणिक त्वात ॥ कंठलग्नमा-
लायाः शूद्रपरत्वस्वीकारे शूद्रस्यद्विजातेराधिक्यापत्ते-
श्चलक्षणाहि ॥ मालाद्विविधा एकाकंठलग्ना अपरा ना-
भिपर्यंताकंठलग्नायथा ॥ हरिभक्तिविलासे गोपाल
भट्टेन एकादशीतत्वे रघुनंदन भट्टाचार्येण ॥ जय
सिंहकल्पद्रुमे जयसिंहदेवेन चोदाहृतं नारदीय वच
नम ॥ येकंठ लग्नतुलसी नलिनाक्षमाला ये बाहुमूल
टफलके लसदूर्ध्व पुण्ड्राः ये बाहुमूल परिचिन्हितशं

खचक्कास्ते वैस्नवा भुवनमा भुपवित्रयंति ॥ नाभि
पर्यंताग्यथा पाद्मे कंठादि नाभि पर्यंतान्तुलसीं यो वहे
न्नरः॥ कुलकोटिं समुद्धृत्य विष्णुलोके महीयते इति
ष्पयंभावः॥ ये कंठलग्नमालास्ते शीघ्रं भुवनं पवित्रयन्ति
॥ यश्चनाभि पर्यन्तमालान्धार यतिसः स्ववंशामात्र मु-
द्धारय तीति वहु शोचलोकि नेष्वे पुनिवंधेसु तुलसीमा
लिकानित्य धारण निषेधोनोप लब्ध इतिवोध्यम नि
वंधास्तु मनुस्मृतिः १॥ हारीतस्मृतिः २ विष्णुस्मृतिः
३ गौतमस्मृतिः ४ शंखस्मृतिः ५ अरुणस्मृतिः ६ द-
क्षस्मृतिः ७ वसिष्ठस्मृतिः ८ व्यासस्मृतिः ९ काश्यपस्मृ-
तिः १० देवलस्मृतिः ११ उशनसः स्मृतिः १२ याज्ञवल्क्यस्मृ-
तिः १३ आचारादर्शः १४ आचारप्रदीपः १५ आचारमयू
खः १६ प्रायश्चित्तमयूखः १७ धर्म मयूखः १८ शांतिमयू-
खः १९ दानमयूखः २० प्रायश्चित्त प्रदीपः २१ प्रायश्चित्तवि
वेकः २२ प्रायश्चित्तशतद्वयी २३ शुद्धविवेकः २४ स्मृति
समुच्चयः २५ शुद्धितत्त्वम् २६ आह्निकनिबंधः २७ अधि
कारनिर्णयः २८ भट्टोजी दीक्षित कृततिथि निर्णयः २९
अनंतदेव कृततिथि निर्णयः ३० निर्णयामृतं ३१ धर्मसा
रः ३२ स्मृतिचंद्रिका ३३ स्मृतिकौस्तुभः ३४ स्मृतिसुधाक-
रः ३५ व्रतार्कः ३६ संस्कार कौस्तुभः ३७ अनूपविलासः ३८
संकल्पकौमुदी ३९ आन्हिकचंद्रिका ४० दानोद्योतः ४१

पद्दिनोत्तिवै ॥ तावतीब्रह्महत्यादि छिनत्येवन संशयः
तुलस्यांसिंचयेद्यस्तु चुलुकोदकमात्रकं ॥ क्षीरोदशा
यिनासार्द्धं वसेदाचंद्रतारकम ॥ कंठकाष्ठरां चापिनृ
त्तिकाष्ठैः करोत्तियः ॥ तुलस्याः शृणुराजेंद्र तस्य पुण्य
फलं महत्त ॥ यावद्दिनानि संतिष्ठेत्कं टकाष्ठरांप्रभो
॥ कुलत्रय युतस्ताव तिष्ठेत ब्रह्मपदे ध्रुवम ॥ तुलसीति
चयोद्भूयाच्चिकालंब दनेयदि ॥ नित्यंसगो सहस्रस्यफ
लमाप्नोति भूसुर ॥ तेनदत्तंहुतं जप्तंकृतं श्राद्धं यथाशि
रे ॥ तपस्तप्तंखगश्रेष्ठ तुलसीयेनरोपिता ॥ शुक्लप
क्षेयदाराजंस्त्र तीयाबुध संयुता ॥ श्रवरोन महाभा
ग तुलसी चातिपुण्यदा ॥ अथ तुलसीमृदः काष्ठस्य
चमाहात्म्यम ॥ तुलसी मृत्तिकालिप्तोयदि प्रारणान्प
रित्यजेत्त ॥ यमेनने क्षितुं शक्तोयुक्तः पापशतैरपि ॥
शिरसिक्रियते यैस्तुतुलसी मूलमृत्तिका ॥ विघ्नानि त-
स्यनश्यंति सानुकूलाग्र हास्तथा ॥ तुलसी मृत्तिका
यत्रकाष्ठं पत्रंच वेश्मनि ॥ तिष्ठते मुनिशार्दूलनिश्च-
लं वैष्णवं पदम ॥ वृहन्नारदीये ॥ तुलसी मूल संभूता
हरि भक्त पदोद्भवा ॥ गंगोद्भवाच मृल्ले खानयत्य
च्युत रूपताम ॥ विष्णुधर्मोत्तरेपि ॥ पत्रं पुष्पं फलंका
ष्ठं त्वक् शाखापल्लवांकुरं ॥ तुलसी संभवं मूलंपा
वनं मृत्तिकाद्यपि होमं कुर्वंतिये विप्रास्तुलसीकाष्ठ

वह्निना ॥ लवेलवे भवत्सुराय मग्निष्टोम शतोद्भवम् ॥
नैवेद्यं पचते यस्तु तुलसीकाष्ठ वह्निना ॥ मेरु तुल्यं भवे
दन्नं तद्दत्तं केशवाय हि ॥ शरीरं दह्यते येषां तुलसी
काष्ठ वन्हिना ॥ नतेषां पुनरा वृत्तिर्विष्णु लोकात्कथं
चन ॥ ग्रस्तो यदि महापापैर गम्यागमनादिकैः ॥ मृ
तः शुध्यति दाहेन तुलसी काष्ठ वन्हिना ॥ तीर्थं य
दि न संप्राप्तं स्मृतिर्वा कीर्तनं हरेः ॥ तुलसी काष्ठ द-
ग्धस्य मृतस्य न पुनर्भवः ॥ यद्येकं तुलसी काष्ठ
मध्ये काष्ठस्य यस्य हि ॥ दाहकाले भवेन्मुक्तिः
पापकोटि युतस्य च ॥ जन्मकोटि सहस्रैस्तु तोषि
तो यैर्जनार्दनः ॥ दह्यंते ते जनालो के तुलसी काष्ठ
वन्हिना ॥ अथ तुलसी पत्र धारणे माहात्म्यम् स्कां
दे ॥ यस्य नाभिस्थितं पत्रं मुखे शिरसि कर्णयोः ॥
तुलसी संभवं नित्यं तीर्थैस्तस्य मखैश्च किम् ॥ यः क
श्चिद्वैष्णवो लोके मिथ्याचारोप्य नाश्रमी ॥ पुना
ति सकलान्लोकान् शिरसा तुलसीं वहन् ॥ वृहन्ना
रदीये ॥ कर्णे न धारये यस्तु तुलसीं सततं नरः ॥
तत्काष्ठं चापि राजेन्द्र तस्य नास्तु पपातकम् ॥ तु
लसीदल संमिश्रं यस्तोयं शिरसा वहेत् ॥ सर्वती
र्थाभिषेकः स्यात्तेन प्राप्तं फलं ध्रुवम् ॥ तुलसीं प्रा-
प्य यो नित्यं न करोति समार्चनं ॥ तस्याहं प्रतिगृह्ण

मिनपूजांद प्रावार्षिकीम् ॥ वर्ज्यपर्युषितं तोयं बर्ज्यंप
र्युषितं दलम ॥ नबर्ज्यंजान्हवीतोयंन बर्ज्यं तुलसीद
लम् ॥ तुलसीपत्र माद्रायय: करोतिममार्चनं ॥ नपु
नर्यो निमाप्नोति मुक्ति भागी भवेद्धिसः ॥ नमंजरिद
लैर्युक्तं तुलसी संभवैः क्षितौ ॥ कुर्वन्तिपूजनं विस्नोस्तेकृ
तार्थाः कलौयुगे ॥ विस्नुरहस्ये ॥ कृस्नावाप्यथवा कृस्ना
तुलसी कृस्नवल्लभा ॥ सितावाप्यथवा कृस्ना द्वादशी
वल्लभाहरेः तावद्गर्जंति रत्नानि कौस्तुभादीन्यहर्निशं
॥ यावन्न प्राप्यते कृस्नातुलसी पत्रमंजरी नारदीये ता
वद्गर्जंति पुष्पाणि मालत्यादीनि भूसुर ॥ यावन्न प्रा-
प्यते पुण्या तुलसी कृस्नवल्लभा ॥ अगस्त्य संहिताया
म ॥ पूर्वमुग्रंतपः कृत्वावरंव्रेमनस्विनी ॥ तुलसी सर्व
पुष्पेभ्यः पत्रेभ्यो वल्लभा ततः ॥ पाद्मे ॥ सत्वंप्रीतिकरंवा
क्यंकोपस्तस्यास्तु तामसः ॥ भावद्वयं हरौजातं यत्त
त्पर्णद्वयंत्वभूत ॥ श्यामापि तुलसी विस्नोः प्रिया गौ-
रीविशेषतः ॥ यथालक्ष्मी प्रियाविस्नोस्तुलसी चततो
धिका ॥ स्कांदे ॥ यत्फलं सर्व पुष्पेसु सर्वपत्रेसु नारद ॥
तुलसीदल मात्रेण प्राप्यते केशवार्चने ॥ वर्णाश्रमेतरा
णांचपूजा यास्त्येव साधनम् ॥ अपेक्षितार्थदं नान्यज्ज
गत्यस्ति तपोधन ॥ पापहारित्वं पाद्मे ॥ श्रीमत्तुलस्या-
र्चयतेस सद्वरिं पत्रैस्सुगंधैर्विमलैरखंडितैः ॥ यस्तस्य

पायं पटसंस्थितं प्रभुर्निरीक्ष्य चित्वा मृजतेस्वयं यमः॥स्कां
दे॥तुलसीदल लक्षेणयोर्चयेत द्वारकाप्रियम्॥जन्मा
युत सहस्रस्य पापस्य कुरुते क्षयम॥स्कांदे॥किंक
रिष्यतिसंरुष्टोयमो पिसह किंकरैः॥तुलसीदलेनदे
वेशः पूजितो येनदुःखहा॥अगस्त्य संहिता यांच॥
नतस्य नरक क्लेशोयो ऽर्चयेत्तुलसीदलैः॥पापिष्ठो
वाप्य पापिष्ठः सत्यं सत्यं न संशयः॥तीर्थयात्रादि
भिरहो काल क्षेपेण किंजनाः ये ऽर्चयंतिहरे र्बिम्बं तु-
लसीदल कोमलैः॥अगस्त्य संहितायांच॥पुण्यांतरे
रंतरितंनिर्मितं तुलसीदलैः॥ माल्यंमलयजालिप्तं
दद्याच्छ्रीराम मूर्द्धनि॥किंतस्य बहुभिर्यज्ञैः संपूर्णवर
दक्षिणैः॥ किंतीर्थ सेवयादानैरुग्रेण तपसापिवा॥अग
स्त्यसंहितायाम॥पत्रं पुष्पं फलं चैवश्री तुलस्यास्स
मर्पितम॥रामायमुक्ति मार्गस्य द्योतकं सर्वसिद्धिदम
॥गारुडे॥तावद्भ्रमति संसारे विमूढः कलिवर्त्मनि॥
यावन्नाराधयेद्देवं तुलसीभिः प्रयत्नतः॥तत्रैवश्री
भगवदुक्तौ॥तुलसीपत्रमादाययः करोति समर्चनम
॥नपुनर्योनिमायाति मुक्ति भागीभवेन्नरः॥अगस्त्य
संहितायाम॥तुलसीपत्र मादाययोऽर्चयेद्राम मंदिरे
सयाति पराम्भक्तं ब्रह्मपुनरावृत्ति दुर्लभम॥तुलसी
कुसुमैरा भक्त्याभ्यर्च्य जनार्दनम॥नरो याति

कालादर्शः ४२ एकादशीमीमांसा ४३ कालनिर्णयः ४४॥ दानविवेकः ४५ ब्राह्मणसर्वस्व ४६ कालमाधवः ४७ कृत्यरत्नावली ४८ दानहारावली ४९ प्राप्तिचिंतामणि ५०॥ पुरुषार्थचिंतामणिः ५१ जयसिंहकल्पद्रुमः ५२ जगत्क्षेमोदयः ५३ मदनप्रदीपः ५४ शौनककारिका ५५ दिनकरोद्योतः ५६ मनोजसुन्दरः ५७ मर्य्यादासिंधुः ५८ सर्वसंग्रहः ५९ माधवकारिका ६० विधानपारिजातः ६१ हरिभक्तिभास्करः ६२ हरिभक्तिविलासः ६३ एकादशीतत्वम् ६४॥ रामार्चनचंद्रिका ६५ अथ तुलसीवनपूजाविधिः॥ प्रागदत्वार्घ्यं ततो ऽभ्यर्च्य गंध पुष्पाक्षतादिना॥ स्तुत्वाभगवतीं तांच प्रणमेत्साष्टांगं दंडवत तत्रार्घ्यमंत्रः॥ वैष्णवामृते व्यासः॥ श्रियः श्रिये श्रिया वासे नित्यं श्रीधरसत्कृते॥ भक्त्या दत्तं मया देवि गृहाणार्घ्यं नमोस्तुते॥ पूजामंत्रः॥ निर्मितात्वं पुरादेवै रर्चितात्वं सुरासुरैः॥ तुलसीहरमेपापं पूजां गृह्ण नमोस्तुते॥ स्तुतिश्च॥ मनः प्रसादजननी सुखदा भाग्यवर्द्धिनी॥ आधिव्याधि हरी नित्यं तुलसी त्वंनमोस्तुते॥ प्रार्थना॥ श्रियंदेहि यशोदेहि कीर्तिमायुस्तथा सुखं॥ बलंपुष्टिं तथा धर्मं तुलसी त्वं प्रयच्छमे॥ प्रणाम वाक्य मावंतीखंडे॥ यादृष्टा निखिलाघसंघ शमनी स्पृष्टावपुः पावनी रोगाणाम भिवंदिता निरसनी सिक्तांतक त्रासिनी॥ प्रत्यासत्ति विधायिनी

भगवतः कृष्णस्यसंरोपिता न्यस्तातच्चरणे विमुक्ति फल
दातस्यै तुलस्यैनमः॥ अथतुलसीपूजा माहात्म्यं स्कांदे
॥प्रयागस्नान निरतो काश्यां प्राणविमोक्षणे ॥ यत्फल
विहितं वेदैस्तुलसी पूजनेनतत् अगस्त्य संहितायां च
तुर्णामि पिवर्णानां आश्रमाणां विशेषतः॥ स्त्रीणां पुरु
षाणांच पूजितेष्टंददातिहि॥ तुलसीरोपिता सिक्ताद्दृष्टा
स्पृष्टाच पावयेत् आराधिता प्रयत्नेन सर्वकामफलप्र-
दा॥ प्रदक्षिणां भ्रमित्वायेन मस्कुर्वं तिनित्यशः नतेषां
दुरितं किंचिदक्षीणमव शिष्यते॥ बृहन्नारदीये॥ पू
ज्यमानाच्च तुलसीयस्य वेश्मनि तिष्ठति॥ तस्यसर्वा-
णि श्रेयांसि वर्द्धंतेहर हर्द्विजाः॥ पाद्मे॥ पक्षे पक्षेतु-
संप्राप्ते द्वादश्यां वैश्यसत्तमं॥ ब्रह्मादयोपि कुर्वंतितुल
सीवन पूजनम॥ श्रीतुलसी स्तुतिमहिमा॥ अनन्य मन
सानित्यं तुलसीं स्तौतियोनरः॥ पितृदेव मनुष्याणांप्रियो
भवति सर्वदा॥ अथतुलसी वनमाहात्म्यम॥ स्कान्दे॥
रतिंव ध्नाति नान्यत्र तुलसीकाननं विना॥ देव देवो
जगत्स्वामी कलि काले विशेषतः॥ नधात्री सफलायत्र
ननविष्णुस्तुलसी वनम॥ तन्म्लेच्छ सदृशंस्थानंयत्र
नायांति वैष्णवाः॥ केशवार्थंक लौयेतुरोपयं तोह भूत-
ले॥ किंकरिष्यत्य संतुष्टो यमोपिसह किंकरैः॥ तुल
स्यारोपणं कार्यं श्रवणेन विशेषतः अपराधसहस्राणि

(तुलसी)

श्रम ते पुरुषोत्तमः ॥ घटैर्यत्रघटी भिर्न्नसिं चितंतु लसी वनं ॥ जलधारा भिर्विप्रेंद्र प्रीणितं भुवन त्रयम् ॥ तुलसी गंधमादाय यत्रगच्छति मारुतः ॥ दिशोदशाच पूताः स्युर्भूत ग्रामश्चतुर्विधः तुलसीकाननो द्भूत छा यायत्र भवेद्द्विज ॥ तत्र श्राद्धं प्रदातव्यं पितृणांतृप्तिहे तवे ॥ तुलसी बीजनिकरः पतते यत्र नारद ॥ पिंडदा- नं कृतं तत्र पितृणांदत्तम क्षयम ॥ दृष्टास्पृष्टातथा ध्याताकीर्तित्ता नमिताश्रुत्ता ॥ रोपित्तासेविता नित्यंपू जिता तुलसी शुभा ॥ नवधातुलसीं नित्यंये भजंति दिने दिने ॥ युगकोटिसहस्त्राणि ते वसं ति हरे र्गृहे रोपित्ता तुलसी यावत्कुरुते मूलविस्तरं ॥ तावत्कोटि सहस्त्रं तु तनोत्ति सुकृतंकलौ ॥ यावच्छाखा प्रशा खाभिर्बीज पुष्पैः फलैर्मुने ॥ रोपित्ता तुलसीपुंभिर्वर्द्धं तेवसु धातले ॥ कुलेतेषांतु ये ज्ञातायेभविष्यंतिये मृताः ॥ आकल्पं युगसाहस्त्रं तेषांवासो हरेर्गृहे ॥ तु लसीयेवि चिन्वंति धन्यास्ते करपल्लवाः ॥ केशा वार्थे कलौयेच रोपयंतीह भूतलेपावने ॥ नपश्यंतिय मं वैश्य तुलसी वनरोपणात ॥ सर्व पाप हरं सर्व काम दंतुलसी वनम ॥ तुलसी काननं वैश्य गृहे यस्मिंस्तुति ष्ठति ॥ तद्गृहं तीर्थ भूतंहि नायांति यमकिंकराः ॥ ता वद्वर्ष सहस्त्राणि या वद्बीज दलानिच ॥ वसंति देव

लोकेतु तुलसीं रोपयंतिये ॥तुलसी गंधमाघ्रायपितरस्तु
ष्टमानसाः प्रयांतिगरुडा रूढास्तत्पदं चक्रपाणिनः ॥आ
म्रवृक्ष सहस्रेण पिप्पलानांशतेनच ॥यत्फलं हितदेके
नतुलसी विटपेनतु ॥विष्णुपूजन संयुक्तस्तुलसीं यस्तु
रोपयेत्॥युग युतदशो कंसतोपकोसमेत दिवि॥पुष्करा
दीनितीर्थानि गंगाद्याः सरितस्तथा वासुदेवाद्यो देवा
वसंति तुलसीदले॥ नावज्ञा जातु कार्यास्या वृक्षभा-
वान्मनीषिभिः॥यथाहिवासुदेवस्य वैकुंठभोग विग्रहे॥
शालग्राम शिलारूपस्थावरंभु विद्यते॥ तथालक्ष्म्यै
कयशापन्ना तुलसीभोग विग्रहा॥ अपरस्या वररूपं भुवि
लोक हितायवै॥ अगस्त्य संहितायाम॥ विष्णोस्त्रैलो-
क्यनाथस्य रामस्यजन कात्मजा॥ प्रियातथैव तुलसी
सर्वलोकैक पावनी॥तुलसी वाटिका यत्रपुष्पा तरप्र
तावृत्ता॥ शोभतेराघ वस्तत्र सीतयासहितः स्वयम॥तु
लसी विपिनस्यापि समंतात्पावनं स्थलं॥ कोशमात्रं
भवत्येव गांगेयस्यैव पाथसः तुलसीसन्निधौप्राणान् ये
त्यजंतिमुनीश्वर॥नतेषां नरकक्लेशाः प्रयांति परमं प-
दम॥ अनन्यदर्शनाः प्रातर्ये पश्यंति तपोधन॥ अहोरा
त्र कृतं पापंतत् क्षणात्प्रहरं तित्ते गारुडे तुलसी कानने
यस्तु मुहूर्तमपि विश्रमेत्॥ जन्म कोटि कृतात्पापान्मु
च्यते नात्रसंशयः॥श्रृणानि तुलसी मूलाच्चावन्त्य (परि)

तदुंत्यक्त्वा वैस्नवीं शाश्वतीं गतिम् ॥ योर्चयेद्धरिपादाब्जं तुलसी कोमलच्छदैः ॥ नतस्य पुनरावृत्ति र्ब्रह्मलोका त्कदाचन ॥ ब्राह्मे ॥ तुलसीदल गंधेन मालतीकुसुमेन च ॥ कपिलाक्षीर दानेन सद्यस्तुष्यति केशवः ॥ कार्त्तिका दौ फल विशेषस्तत्र ॥ कार्तिके गारुडे ॥ गवाम युतं दानेनय स्फलंलभते रवग ॥ तुलसीपत्रके केनतत्फ लं कार्तिके स्मृतम् ॥ अथमाघे स्कांदे ॥ स्नात्वामहान दी तोये कोमलैस्तुलसी दलैः ॥ यो ऽ र्चये न्माधवं मा घे कुलानां तारये च्छतम् ॥ वैशाखेपाद्मे ॥ तुलसीगौ र कृष्णाख्या तया भ्यर्च्य मधुद्विषं ॥ विशेषेण तुवैशा खेनरो नारायणो भवेत् ॥ स्कांदे ॥ संपूज्य तुलसी भ- क्त्या घनश्यामं जनार्दनं ॥ चतुरो वार्षिका न्मासान श्वमे धायुतं लभेत् ॥ वायुपुराणे ॥ अस्नात्वा तुलसीं छित्वा यः पू जां कुरुते नरः सो ऽ पराधी भवेत्सत्यं तत्सर्वं निष्फलं भवेत् ॥ लवनादौ मंत्रः ॥ स्कान्दे ॥ तुलस्यमृत जन्मासि सदात्वं केशवप्रिया ॥ केशवार्थे चिनोमित्वां वरदाभव शोभने त्वदंगसंभवैः पत्रैः पूजयामि यथा हरिम् ॥ तथाकुरु पवि त्रांगि कलौमल विनाशिनि ॥ गारुडे ॥ मोक्षैकहेतो धर- णिप्रशस्ते विष्णोः समस्तस्य गुरोः प्रियेति ॥ आराध नार्थं वरमंजरी कलुनामि पत्रं तुलसीक्षमस्व ॥ इत्युक्त्वा तुलसीं नत्वा छित्वा दक्षिणा पाणिना ॥ पत्राणयेके

कशोन्यस्येत्सत्पात्रे मंजरीरपि॥ तन्माहात्म्यं स्कांन्दे॥
मंत्रेणानेनयः कुर्याद्गृहीत्वा तुलसीदलं पूजनं वासुदे-
वस्य लक्षकोटि फलंलभेत्॥ शालग्रामशिला र्चार्थं
प्रत्यहं तुलसीक्षितौ॥ तुलसीयेवि चिन्वंति धन्यास्ते
करपल्लवाः॥ संक्रांत्यादौनिषि द्धापितु लस्यवचयः
स्मृतौ॥ परंश्रीविस्नु भक्तैस्तु द्वादश्यामे वनेष्यते॥
अथतुलस्य वचय निषेधकालः विस्नुधर्मोत्तरे॥नछिं
द्यात्तुलसीं विप्राद्वादश्यां वैस्नवः क्वचित्॥ गारुडे॥
भानुवारंविनादूर्वां तुलसीं द्वादशींविना॥ जीवितस्य
विनाशायन विचि न्वीतधर्मवित्॥ पाद्मेच॥ द्वादश्यां
तुलसीपत्रं धात्रीपत्रंच कार्त्तिके॥ लुनातिसनरोगच्छेन्नि
रयानति गर्हितान्॥ देवार्थे तुलसीछेदोहो मार्थेसमि-
धांतथा॥ इंदुक्षयेन दुष्येत गवार्थेतु तृणस्यच सर्वेषां-
पत्राणांमध्ये तुलसी पत्रस्य श्रेष्ठत्वमाह॥ नारसिंहे॥
पत्राण्य पिसुपुण्यानि हरिप्रीतिकराणिच॥ प्रवक्ष्या
मि नृप श्रेष्ठ शृणुस्व गदतोमम॥ अपामार्गेतु प्रथमंभृं
गराजंततः परं॥ ततस्त मालपत्रं चततश्च शमिपत्र
कम्॥ दूर्वापत्रं ततः श्रेष्ठंततोपि कुशापत्रकम्॥ तस्मा
दामलकं श्रेष्ठंततो विल्वस्य पत्रकम्॥ विल्वपत्राद
पिहरेस्तुलसी पत्र मुत्तमम्॥ अथतुलस्य र्पण नित्य
तापाद्ये॥ तुलसीनयेयां हरि पूजनार्थे संपद्यते १–

माधवपुण्यवासरे धिग्योवनं जीवनमर्थसंततिं तेषांसु
खंनेहचहृष्यत्तेपरे ॥ गारुडे॥ तुलसीं प्राप्ययो नित्यं
नकरोतिम मार्चनं॥ तस्याहं प्रतिगृह्णामि न पूजांश
तवार्षि कीम्॥ वृहन्नारदीये॥ यद्गृहेनास्ति तुलसी
शालग्राम शिलार्चने स्मशान सदृशं विद्यात्तद्गृहं
शुभवर्जितम्॥ वायुपुराणे॥ तुलसीरहितां पूजांन
गृह्णाति सदाहरिः काष्ठंवा स्पर्शयेत्तत्र नोचेन्नामतो
यजेत्॥ तुलसीदलमादाय योऽन्यंदेवं प्रपूजयेत्॥ब्र
ह्म हासहिगोघ्नश्च सएवगुरु तल्पगः॥ गारुडेनैवेद्य
प्रसंगे॥ तुलसीदल संमिश्रं हरेर्दद्यात्त्वयत्सदा॥ अथ
तुलसीदल भक्षण माहात्म्यम् गारुडे सित्ता सितं य
थानीरं सर्वपापक्षयावहम्॥ तथाच तुलसीपत्रं प्राशि
तंसर्वकामदम्॥ चांद्रायण सहस्रस्य पराकाणां
शतस्यच॥ नतुल्यंजायते पुण्यं तुलसी पत्रभक्षणात्
॥कृत्वापाप सहस्राणि पूर्ववय सिमानवः॥ तुलसी
भक्षणान्मुच्येच्छ्रुतये तत्सुराहरेः श्रीमत्तुलस्याः पत्र
स्य माहात्म्यंयद्यपी दृश्यम्॥ तथापि वैष्णवैस्तन्नग्रा
सं कृष्णार्पणं विना अथतुलसीमूल मृत्तिका पुंड्रमा-
हात्म्य॥ तुलसीमृत्तिका पुंड्रंललाटे यस्य दृश्यते॥
देहंनस्पृशते पापं क्रियमाणंतु नारद॥ गरुडपुरा
णे॥ तुलसीमृत्तिका पुंड्रंयः करोति दिनेदिने॥ तस्या

वलोकनात्पापं यातिवर्षकृतं नृणाम् ॥ श्रीमद्राम सखे
दूस्यपाद पद्म प्रसादतः ॥ वुधसंमतिपुकपूर्णस्तुलसी
तत्वभास्करः१ नारायण समारंभो पाराशर्यादि मध्य
मां ॥ अस्मदाचार्य पर्यन्तां वंदेगुरु परंपराम् २ इतिश्री
सीताराम कृपापात्र सीतारामीय परमहंस परिव्राज
क हरिहर प्रसाद विरचितस्तुलसी तत्वभास्करःसमाप्तः

श्रीगणेशायनमः

श्रीमतेराम भद्रायनमः॥नमामि सीतां जनक प्रसूतां नमामिरामं रघुवंशजातम्॥नमामिश्री मद्भरतादिबं- धूनमामि वातात्मज सुग्ररूपम् १ असितूणा धनुर्वाणा न रघुनंदन भूपतेः॥नत्वावैष्णव तुष्यर्थं कुर्वे तिल- कभास्करम् २ यजुर्वेदस्य हिरण्यके शीणाखायामू र्द्धं पुंड्रविधिः हरेः पदाकृति मात्मनि धारयतियः सपरस्य प्रियोभवतिस पुण्य वान्मध्ये छिद्रमूर्द्ध पुंड्र योधारयति ससुक्तिभाग्भवतीति हरिभक्ति विलासे कार्तिक प्रसंगे स्कांदवचनं ऊर्द्धपुंड्रोमृदा शुभ्रोललाटे यस्य दृश्यते॥ चांडालोपि विशुद्धात्मा याति ब्रह्म सनातनम ऊर्ध्व पुंड्रइति पुंस्त्वमार्षं॥ऊर्ध्वे पुंड्रे स्थि- तालक्ष्मी रूर्ध्वे पुंड्रेस्थितंयशः॥ऊर्ध्वे पुंड्रेस्थिता मूर्ति रूर्ध्वे पुंड्रेस्थितोहरिः तत्रैव॥पद्मपुराणे॥ऊर्ध्वपुंड्रं मृ दासौम्यं ललाटे यस्य दृश्यते॥सचांडालोपि शुद्धात्मा पूज्यएव नसंशयः तत्रैवोत्तर खंडे शिवोमासम्वादे॥ ऊर्द्धपुंड्रस्य मध्येतु विशालेसुमनोहरे॥ लक्ष्म्या सार्द्धम मासीनो देवदेवो जनार्दनः॥ तस्माद्यस्य शरीरेतु ऊ- र्द्धपुंड्रं धृतं भवेत॥तस्यदेहं भगवतो विमलं मंदिरं स्मृतम ऊर्द्ध पुंड्रधरो विप्रः सूर्यलोकेषु पूजितः॥ विमान वरमारु- ह्य यातिविष्णोः परंपदम॥ऊर्द्धपुंड्रधरं विप्रंदृष्ट्वापापैः

प्रमुच्यते॥ नामस्मृत्वा तथामन्त्रा सर्वदानफलं लभेत्त॥ ऊर्द्धपुंड्रधरं विप्रंयः श्राद्धेभोजयिष्यत्ति॥ आकल्पकोटि पित्तरस्तस्य तृप्तानसंशयः॥ ऊर्ध्वपुंड्रधरो यस्तु कुर्यात्त श्राद्धं शुभानने॥ कल्पकोटि सहस्त्राणि वैकुंठे वासमा प्नुयात्त॥ यज्ञदानतपश्चर्याजप होमादिकं चयत्त ऊर्ध्व पुंड्रधरः कुर्यात्त तस्यपुण्य मनंत्तकम् तत्रैव ब्रह्मांडपु राणे॥ अशुचि र्वाप्यनाचारो मनसापाप माचरन शुचि रेव भवेन्नित्य मूर्द्ध पुंड्रा कित्तोनरः॥ तत्रैव श्रीभगवद्व चनम् ऊर्ध्वपुंड्र धरोमर्त्यो म्रियते यत्र कुत्र चित् श्वपा कोपि विमानस्थो ममलोके महीयत्ते॥ ऊर्द्धपुंड्रधराम- र्त्यो गृहेयस्यान्नम श्नुते॥ तदानिं प्राक्कुलं तस्य नरका दुद्धराम्यहम पुनस्तत्रैव पाद्मे ऊर्द्ध पुंड्रस्य माहा- त्म्यं वक्ष्यामि शुभदर्शने॥ धारणा देवमुच्येत्त भवबं धाद्दि मूढधीः ब्रह्मणचेभगवद्धाकाम॥ योन धारयत्ते मर्त्योमाम कंचिन्दमी द्दशाम् तत्यजामि दुरा त्मानंम दीयात्रा त्तिलघनम्॥ व्यालं दृष्ट्वा यथालोके दर्द्दु- राभयकंपित्ताः ऊर्ध्वपुंड्राकितं तद्दत्त कंपत्ते यमकिं कराः॥ ऊर्द्ध पुंड्रेण संयुक्तो म्रियत्तेय स्तुमानवः चां डालोपि विशुद्धात्मा विष्णुलोके महीयत्ते तत्रैवमा त्स्ये यो विनाचोर्द्धपुंड्रेण यत्कुर्यात्कर्म वैदिकमनि ष्फलं तस्यतत्त कर्म भस्मन्येवाहुत्ति र्यथा हारीते

ऊर्ध्वपुंड्र विहीनस्तु संध्याकर्म समाचरेत् ॥ तत्सर्वं रात्त
सैर्नीतं नरकंसच गच्छति ॥ नित्यंनैमित्तिकं काम्यंत्रिविधं
श्रुतिबोधितं ॥ ऊर्द्ध्वपुंड्र विहीनस्यसर्वं तन्निष्फलं भवेत् ॥
विधानपारिजाते पराशर माधवीयेच ऊर्द्ध्वपुंड्र विहीनस्य
स्मशान सदृशंमुखम् ॥ अवलोक्यमुखं तस्यस्यादित्यम
वलोकयेत् ॥ स्नानंदानंजपोहोमः स्वाध्यायः पितृतर्पणं
॥ भस्मी भवति तत्सर्वमूर्ध्वपुंड्रं विनाकृतम् रघुनंदन भ-
ट्टाचार्यकृताह्निक तत्वेचब्रह्म पुराण वचनम् कर्मादौ
तिलकंकुर्यात् पंतद्वैस्मर्वपरम् गोप्रदानं तपोहोमः स्वाध्या-
यः पितृतर्पणाम् भस्मी भवति तत्सर्वमूर्ध्व पुंड्रं विनाकृत-
म् ॥ अनूपविलासे ब्रह्मांड पुराण वचनम् ॥ यागोदानंत
पोहोमः स्वाध्यायः पितृतर्पणाम् ॥ भस्मी भवति तत्सर्वमू
र्ध्वपुंड्रं विनाकृतम् ॥ आचारदीपे विधान पारिजाते ॥ आ
ह्निकतत्वेच ब्रह्मपुराण वचनम् ऊर्ध्वपुंड्रं द्विजः कुर्यात्क्ष
त्रियस्तु त्रिपुंड्रकम् ॥ अर्द्धचंद्रंतु वैश्यस्यवर्तुलं शूद्रजा
तिषु ॥ ऊर्ध्वपुंड्रंतु सर्वेषांननिषिद्धं कदाचन ॥ धारयेयुः
क्षत्रियाद्याः विष्णु भक्ता भवंतिये ॥ ऊर्ध्वपुंड्रंमृदाकुर्या-
त्त्रिपुंड्रं भस्मनासदा ॥ तिलकं वैद्विजः कुर्याच्चंदनेन यह
च्छया हरिभक्तिविलासे पाद्मवचनात् सामान्य ततस्ति-
लकविधिः वर्तुलंतिर्यगच्छिद्रं ह्रस्वंदीर्घं ततंतनु ॥ वक्रं
विरूपं बद्धाग्रं भिन्नमूलंपदच्युतम् पदच्युतं स्थानभ्रष्टं

अंगुष्ठं सूक्ष्ममासक्तं तथानांगुलि कल्पितम् विगंधं चापस
व्यंच पुंड्र माहुर नर्थकम् अंगुष्ठंमानिनम् आसक्तम न्यो
न्यसंलग्नम् विगंधम् दुर्गंधि अपसव्यं वामहस्तकृतम्॥
तत्रैव शांति दानामि काप्रोक्ता मध्यमायुः करीभवेत् अं-
गुष्ठं पुष्टिदं प्रोक्तं तर्जनी मोक्षदायिनी॥ अनूप विलास
न्हिक तत्त्व विधान पारिजात कल्पतरु धर्मसंग्रहो दाह
तास्मृतिश्च अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमायुः करोभ
वेत॥ अनामि काम्भियंदद्यान्मुक्तिदद्यात्प्रदेशिनी हरि
भक्ति विलासे आन्हिक तत्त्वेच ब्रह्मांड पुराण वचनम् वी-
क्ष्यादर्शेजले वापियो विदध्यात्स यत्नतः ऊर्ध्व पुंड्रं म
हाभाग सयाति परमांगतिम् कल्पतरो आन्हिक निबंधे
विधान पारिजातीय आन्हिके हरिभक्ति विलासे रघुनं
दन भट्टाचार्यकृत आन्हिक तत्त्वेच ब्रह्माण्ड पुराण वच
नानि॥ पुंड्राणां धारणार्थाय गृण्हीयात्त्श्वेत मृत्ति
काम्॥ श्रीरंगव्यंकटाद्रौच श्रीकूर्मेयादवाचले॥ प्रया
गे नारसिंहाद्रौ वाराहे तुलसीवने॥ द्वारवत्यां शुभेर-
म्ये वासुदेव ह्रदेत्तथा सिंधुतीरेच वल्मीके हरिक्षेत्रे वि-
शेषतः विष्णु पादोदकं यत्र प्रवाहयन्ति नित्यशः॥ मृद
एतास्तु संग्राह्या वर्जये दन्यमृत्तिकाः गृहीत्वा मृत्ति-
कां भक्त्या विष्णुपादजलैस्सह धृत्वा पुंड्राणि चांगेषु वि-
ष्णुसायुज्य माप्नुयात्॥ यत्तुदिव्यं हरिक्षेत्रं तस्यैव मृद

माहरेत ॥ कल्पतरुवंतर्गतत्तान्हिकनिवंधे ब्रह्मांड वचनम्
मृत्तिकाचंदनं चैव भस्मत्तोयं चतुर्थकम् ॥ एभिर्द्रव्यै
र्यथाकाल मूर्ध्वपुंड्रंभवेत्सदा स्नात्वापुंड्रं मृदाकुर्या
द्धुत्वाचैवत्तु भस्मना ॥ देवानभ्यर्च्यगंधेन सर्वपापा
पनुत्तये जलेनतिलकं कुर्याज्जलांते कर्म सिद्धये भ
स्म नाधूप शोषेण तिलकं मध्यसं प्रदायानु यायि
नाम् देवान भ्यर्च्य गंधेने त्यस्यायंभावः भगवन्नि-
र्माल्य चन्दनेन तिलकं विधेयं नत्वन्येन यत्तुनकदापि
न्मृदातिर्यकन्य सेदूर्ध्वंन भस्मनेत्ति निसेध विधाय
कवचनम् तद्रूपशेयत्तर भस्मपरम् अत्तएव मृत्तिका
चंदने त्यादिना ॥ भस्म नोर्ध्वपुंड्रस्यविधानंसार्थक-
म् अथगोपीचंदन माहात्म्यम् हरिभक्ति विलासेपा
द्मवचनम् ब्रह्मघ्नोवाथ गोघ्नोवाहेतुकः सर्वपापकृत्तगो-
पीचंदन सम्पर्कात्पूतो भवति तत्क्षणात् गोपीचंदन खं
डंतुयोददातिहि वैस्मवे कुलमेकोत्तरं तेनसंतरे त्तारितं
शतम् तत्रैव स्कांद पुराणे धुवेणोक्तं गोपीमृत्तुलसी शं-
खः शालग्रामः सचक्रकः गृहेपियस्यपंचैते तस्यपापभ
यंकुतः तत्रैवकाशीखंडेच श्रीयमेन श्रीखंडे कस आ-
मोदः स्वर्णोवर्णः कतारणः ॥ तत्माविन्यं कवेतीर्थे श्री
गोपीचंदनेयथा अथगोपीचंदनो र्ध्वपुंड्र माहात्म्य
म ॥ तत्रैव गरुड़पुराणे ॥ योमृत्तिकां द्वारवतीसमुद्भवां

करेसमादाय ललाट पट्टके करोतिनित्यं त्वथचोर्ध्वपुं ड्रं क्रियाफलं कोटिगुणंसदा भवेत् क्रियाविहीनं यदि मंत्रहीनं श्रद्धाविहीनं यदिकालवर्जितम् कृत्वाललाटे यदिगोपिचंदनं प्राप्नोतितत्कर्म फलंसदाक्षयम् गोपीचंदनमिति ह्रस्वत्वमार्षमिति केचित् ॥ वस्तुतस्तु ङ्यापोस्संज्ञाच्छन्दसोर्व हुलमित्यनेन ह्रस्वो बोध्यः ॥ यद्यपि क्रियादिहीनं कर्म स्यात् तथापि गोपीचंदनं करेकृत्वा तेनोर्ध्वपुंड्रं निर्माय तत्फलमक्षयं प्राप्नोतीत्यर्थः ॥ गोपीचंदनसंभवं सुरुचिरं पुंड्रंललाटे द्विजोनित्यं धारयते यदिद्विजपते रात्रौ दिवासर्वदा यत्पुण्यंकुरुजांगलेरविग्रहे माघ्यांप्रयागे तथा तत्प्राप्नोति खगेंद्र विष्णुसदने संतिष्ठते देववत् ॥ यस्मिन् गृहेतिष्ठति गोपिचंदनं भक्त्याललाटे मनुजोविभर्ति तस्मिन्गृहे तिष्ठतिसर्वदाहरिः श्रद्धान्वितः कंसनिहाविहंगम ॥ योधारयेत्कृष्ण पुरी समुद्भवां सदापवित्रां कलिकिल्बिषापहाम् नित्यं ललाटे हरिमंत्र संयुतांयमंनपश्येत् यदि पापसंवृतः यस्यांतकालेखग गोपिचंदनं वाह्वोर्ललाटे हृदिमस्तकेच ॥ प्रयाति लोकं कमलालयं प्रभोगो वालघातीयदि ब्रह्महाभवेत् ॥ ग्रहानपीडंतिनरक्ष सांगणायक्षाः पिशाचोरग भूत दानवा ललाट पटेखग गोपिचंदनं संतिष्ठते यस्यहरेः प्रसा (ह०)

दत: नपीडंति नपीडयंति तत्रैव पद्मपुराणे श्रीगौतमे
न अंबरीष महाघस्य क्षयार्थे कुरुदीक्षणाम् ललाटेयैः
कृतंनित्यं गोपीचंदनपुंड्रकम् तत्रैव काशीखंडे श्रीयमे
नदूताः शृणुतयद्भालं गोपीचंदनलांछितम् ज्वलदिं
धनवत् सोपित्या ज्योदूरे प्रयत्नतः आन्हिकतत्वेअनू
पविलासेच शातातपः गोमतीतीरसंभूतां गोपी वापीस
मुद्भवाम्॥ मृदंमूर्ध्नी वहेद्यस्तु सर्वपापैः प्रमुच्यते इ
ति तुलसीमूल मृत्तिका माहात्म्यं हरिभक्तिविलासोदा
हृतपद्मपुराणे तथाहि अथतस्योपरि श्रीमत्तुलसीमू
ल मृत्स्नया तत्रैव वैस्नवैः कार्य मूर्ध्वपुंड्रं मनोहरं तन्मृ
दं गृह्ययैः पुंड्रं ललाटे धार्यते नरैः॥ प्रयाणके कृते तै
स्तु मोक्षाय गमनं प्रति गृह्य गृहीत्वा तत्रैवच कार्तिक
माहात्म्ये ब्रह्मनारद संवादे तुलसी मृत्तिका पुंड्रं लला
टे यस्य दृश्यते देहंनस्पृशते पापं क्रियमाणं तु नार
द गरुड पुराणे तुलसी मृत्तिका पुंड्रंयः करोति दिने
दिने तस्यावलोकनात्पापं यातिवर्ष कृतं नृणामिति
तस्योपरिस्थात् भगवान् निर्माल्यमनुलेपनम् तथैव
धार्यमेवंहि त्रिविधं तिलकं स्मृतम्॥ अथगंगामृत्ति-
कायाः सिकतायाश्च धारण माहात्म्यं भारते दानध
र्मे॥ गंगातीर समुद्भूतां मृदं मूर्ध्नाविभर्तियः विभर्तिरूपं
सोर्कस्य तमोनाशाय केवलम् काशीखंडे प्येव मेवपठि

तम जान्हवी पुलिनोत्थाभिः सिकताभिः समुक्षितम्
आत्मानं मन्यते लोकोदि विष्ठमिव पोगभितम पाद्येच॥
यस्तुगंगामृदः पुंड्रं नयेद्भावे द्विजोत्तम सद्यस्त दर्शना देव
पापीपापैः प्रमुच्यते॥ ललाटे दृश्यते यस्य गंगा सैकत
मुत्तमम् सपुण्यवान् जगत्सर्वं पुनात्यत्र न संशयः॥ आ
न्हिक तत्वे उशनाः अभावेतू दकेनापि पुंड्री दैवत मर्चये
त॥ अनूपविलासे विष्णुः ऊर्ध्वपुंड्रं द्विजातीनाम ग्निहो
त्र समोविधिः श्राद्धकालेतु संप्राप्ते कर्ताभोक्ताच वर्जे
येत नारायणाःऊर्ध्वपुंड्रं त्रिपुण्ड्रंवाचंद्राकारमथापिवा॥ श्रा-
द्धकातान कुर्वी तया वर्सिडान्ननिर्वपेत्॥ विश्वादर्षे पर
णः॥ ऊर्ध्वंच तिलकं कुर्यान्नच कुर्यात्त्रि पुंड्रकं ऊर्ध्वं तु
तिलकं कुर्याद्दैवे पित्र्यच कर्मणीति वचना छ्राद्धे तिलक वि
कल्प इत्येके॥ पित्र्येस्य तर्पणादौ सावकाशत्वात्पूर्ववं
चनविरोधाच्च नेत्य परेन दैवार्हेनच श्राद्धे नाभ्यंगेनच
शूद्रतः गोपीचंदन लेपस्तु इत्येवं मनुरब्रवीदिति वि
श्वादर्श वचनात्तिलक निषेधो गोपीचंदन तिलकविष
यइत्यन्ये वयंतुस्मृति पुराण संहितावाक्यानां गोपीचं
दनो पनिष द्वासुदेवो पनिष दादि श्रुतिभिर्विरोधा-
भावायनि षेधवचनानि काम्य तिलक पराणीति अत
एव ऊर्ध्वंच तिलकं कुर्याद्दैवे पित्र्येच कर्मणि इत्यादि
वचनानि संगच्छंते तिलककरण मंत्र माह ब्रह्मांड

पुराणे ॥ ललाटे केशवंध्याये न्नारायण मथोदरे वक्षः
स्थले माधवंच गोविंदंकंठ कूपके विस्नुंचद क्षिणे कु-
क्षौवाहौच मधुसूदनम त्रिविक्रमं कंधरेतु वामनंवाम
पार्श्वके श्रीधरंवाम वाहोतुहृषीकेशंतुकं धरे ॥ पृष्ठे
तु पद्म नाभं चत्रिकिदामोदरं न्यसेत तत्प्रक्षाल न
तोयंतुवासुदेवेति मूर्द्धनि तत्रसंज्ञाणि तन्मूर्तिंध्यात्वा
मंत्रेण धारयेत मंत्रास्तु ॐकाराद्यानमोंताश्च तुर्थ्यंताः
केशवादयो द्रष्टव्याः केशवादिमूर्त्तीनां ध्यानं यथा
पाद्मेचतुश्चक्रं नमस्यामि केशवं कनक प्रभम नारा
यणं घनश्यामं चतुःशंखंनमाम्यहम माधवं मणि
संगा भंचिंतयामि चतुर्गदम चंद्रवर्णंच तुश्चापं गोविं
दम पिसंश्रये विस्नुंचतुर्हलं वंदे पद्मकिंजल्कवर्चसम
चतुर्मुशल मब्जाभं सं श्रयेम धुसूदनम आश्रयामिचतुः
खड्ग मग्नि वर्णंत्रि विक्रमम ॥ वामनं वालसूर्याभं चतु
र्वज्रं विभावये ॥ श्रीधरं पुंडरीकाभंचतुः पद्मंसमाश्रये।
चतुर्मुद्गरकं नौमिहृषी केशंत डित्प्रभम पंचायुधंपद्म
नाभं प्रणमाम्यर्क वर्चसम दामोदरं चतुः पाशमिंद्र
गोपनि भंभजे वासुदेव मुपास्येऽहंपूर्णेन्दुद्युतिसन्नि
भं॥ अथांगविशेषेण तिलक परिमाणमाह ब्रह्मांडपुरा
णे ॥ ललाटे भुज युग्मेतु पृष्ठयोः कंठकूपके धारयेदू
र्ध्वपुंड्रंच चतुरं गुलमायतम कुक्षौतत्पार्श्वयोःप्रोक्त

मायतंतु दशांगुलम् बंह्लोर्वक्षः स्थलेपुंड्र मष्टांगुल मुदा
हृतम् एवंद्वादशपुंड्राणि ब्राह्मणाः सततं धारेत् अंतराले-
षु सर्वेषु हरिद्राधारयेच्छ्रियम् ॥ हरिभक्तिभास्करोदा हृत
म् ॥ हरिद्राचूर्ण धारणमंत्रमाह ॥ श्रियैनमः वागीश्वर्यै
नमः ॥ कांत्यैनमः क्रियायैनमः ॥ शक्त्यैनमः ॥ विभूत्यैन
मः ॥ सिद्धायैनमः प्रीत्यैनमः ॥ रत्यैनमः धियेनमः महि-
म्न्यैनमः महालक्ष्म्यैनमः इत्यादिविधान पारिजातोदा
हृतवासुदेवो पनिषदि गृहस्थोललाटादि द्वादशस्थले
ष्वनामिकांगुल्या विष्णुगायत्र्या केशवादि द्वादश ना-
म भिर्वाधारयेत् ब्रह्म चारी वान प्रस्थोवा ललाट कंठ
हृदय बाहुद्वय मूलेषु वैष्ण व्यागाय त्र्योक्त कृष्णादि पंच
नाम भिर्वाधारयेत् ॥ यतिस्तर्जन्या शिरोललाट हृदयेषु
प्रणावेन धारयेत् ब्रह्माद यस्त्रयोमूर्त्त यस्तिस्रोव्याहृ-
तयस्त्रीणि छंदांसि त्रयोवेदा अकारो कार मकाराएते
सर्वेप्रणाव मयोर्ध्व पुंड्रत्रयात्मका स्तदेत दोमित्येकया-
समभवत् परमहं सो ललाटे प्रणावेनैक मूर्ध्व पुंड्र वाधा
रयेत् ब्रह्मरात्रे भगवद्दाकाम पिप्रणावेनैव मंत्रेण मृदावै
माम नुस्मरन् ॥ ललाटे धारयेन्नित्यं विष्णुसा लोका माप्नु
यात् स्कांदे ॥ चतुरंगुलमूर्ध्वी गंद्व्यंगुलं विस्तृतं मृदा ऊ
र्ध्वपुंड्रं द्विजः कुर्यात्सांतरालं मनोहरं द्व्यंगुलं त्र्यंगुलं वा-
पिमध्ये छिद्रं प्रकल्पयेत् ॥ द्व्यंगुलं पार्श्वमेकंतु ऊर्ध्वपुंड्रस

लक्षणम ॥भारद्वाज संहितायाम आचम्यधारये पुंड्रा मृदा शुभ्रेण पूर्ववत् नासिका मूलमारभ्य आकेशांतं प्रकल्पये त् नासिका मूल लक्षणंतु पाद्मे आरभ्य नासिका मूलं ल लाटांतं लिखेन्मृदम् नासिकायास्त्रयो भागानासामूलं प्रचक्षते समारभ्य भ्रुवोर्मूलमंतरालं प्रकल्पयेत इतिअं तरालेषु सर्वेसु हरिद्राधारये च्छ्रियम् एतेन पूर्वोक्तवचनेन पीता अरुणाच श्रीर्गृह्यते द्वयोरपिहरिद्राविकारत्वात आचम्य धारये पुंड्रा मृदा शुभ्रेण पूर्ववत् इत्यत्र पुंड्रा- निति बहु वचन सामर्थ्यानयोऽपिपुंड्रा मृदैव कार्या इति लक्ष्यतेतेन सितापिश्री विहितैव किंच ऊर्ध्व पुंड्रं द्विजः कुर्यात्सांतरालं मनोहर मित्युक्तया मध्ये छिद्रं प्रकल्पयेदि त्युक्त्याच मध्ये शून्य मपि विधेयम ईदृशं तिलकं श्रीमच्च तुर्भुजानुयायिनाम हरिभक्तिविलासस्थस्कांद वचनम धारये द्विप्र निर्माल्यं धूप शेष विले पनम् वैस्नवं का र्यस्तुंड्रं गोपीचंदन संभवम तत्रैव ब्रह्मांड पुराण वच- नानि दशांगुल प्रमाणंतु उत्तमोत्तम मुच्यते नवांगुलंम ध्यमं स्यादष्टांगुल मतः परम एतैरं गुलिभेदैस्तु कारये- न्ननखैः स्पृशेत् ईदृशंतिलकंतु श्रीमत गौरांग संप्रदाये प्रचरितम् तदपिमध्य छिद्रसहितं भवति तथोक्तंतत्र- स्थपद्म पुराण वचनेन एकांतिनो महा भागाः सर्वभूतहि तेरताः सांतरालं प्रकुर्वंति पुंड्रं हरि पदाकृति निरंतरा

लोर्ध्व पुंड्रस्य निंदातत्रैव निरंतरालंयः कुर्या दूर्ध्व पुंड्रं द्वि-
जाधमः सहितत्रस्थितं विस्नु लक्ष्मीचैव व्य पोहति अ-
छिद्रमूर्ध्व पुंड्रं तुयेकुर्वंति द्विजाधमाः तेषां ललाटे सत्त
तं शुनः पादोन संशयः हरिमंदिर लक्षणंतु नासादि
केशपर्यंत मूर्ध्व पुंड्रंसु शोभनम मध्येछिद्र समायुक्तं
तद्धि विद्धरिमं दिरम् वाम पार्श्वेस्थितो ब्रह्मा दक्षिणेतु
सदाशिवः॥ मध्ये विस्नु विजानीयात्तस्मान्मध्यंन लेप
येत् यत्तुधर्म संग्रहो दाहृत वचनम दर्भपाणिः प्रकुर्वी
तभ्रूमध्यात्तु प्रदीपवत् श्रीकामः पुष्टि कामस्तुयवे स्तंति
लकं चरेत्॥ नासामूलं समारभ्यवं शपत्र निभं शुभम व-
श्यकामो द्विजः कुर्या त्तिलकं चंदनादिना॥ नपादुका
स्थोना दर्पणजले नावलोकयन् नप्रावृत शिराः कु-
र्यात्तिलकं धर्म साधनम् तत्तुसकाम विषयकम् अन्य-
था स्मृतिसुसां तराल तिलक विधि दर्शनी दूस्या प्रा-
माण्या पत्तिः स्यात्त हरि भक्ति विलासस्थ पाद्मवचने
पि॥ निरंतराल तिलकस्य॥ काम्य परत्वम स्पष्टम॥
तथाहि अश्वत्थपत्र संका शंवेणु पत्रा कृतिस्तथा
पद्मकुड्मल संकाशं मोहनं त्रितयं स्मृतम न पादु
कास्थोना दर्पणजले चेति निषेधोपि काम्य विषयः
वश्य काम इत्यादि काम्य वचन साह चर्यात् ह-
रि भक्ति विलासस्थ पाद्म वचनम प्रणामं शांति

कारं प्रोक्तं रक्तं वश्यकरं तथा श्रीकरं पीतमित्या
हुः श्वेतं मोक्षपदं शुभम् एतेन श्वेते तर मृत्तिका
पुंड्राणि काम्य पराणि ज्ञातव्यानि पद्म पुराणेऊ
र्ध्वे पुंड्रमृजुं प्रोक्तं दंडाकारंसु शोभनम् कौंकुमं
यस्य भालेतु सवै भागवतोत्तमः बृहन्मनु स्मृतौऽस्त्वे
वासुदेवस्य भुक्तशेषं तुकुंकुमम् अरुणं तेनकुर्याद्दे
दंडाकारोर्ध्वे पुंड्रकम् ॥ भविष्यत्त पुराणे हारिद्रेना
रुणे नैवकुंकुम भुक्तेन पुंड्रकम् ॥ कृत्वाकर्म सुकुर्वीतत्त
चानं स्नायकल्पते ऊर्ध्वे पुंड्रं द्विजः कृत्वा रक्तं कुंकुमसं
भवम् ॥ हरि नामाक्षर युतं सेवां कुर्याद्धरे द्विजःऊर्ध्वे
पुंड्रमृजुमित्यारभ्य सेवां कुर्याद्धरेरित्यंतेनो क्तम् ॥
तिलकं श्री मद्वल्लभा चार्यानु यायि नाम विधान-
पारि जातो दा हृत वैखान समूत्रे भस्म नो-
र्ध्वे पुंड्र मुक्तम् तद्यथा भूतिर्भस्मे ति॥भस्मगृहीत्वाल-
लाट हृदय बाहुकंठेष्वादित्यःसोमोमम इत्यूर्ध्वाग्रमा
लिखेदिति पुरुषार्थ प्रबोध विधान पारिजातो दाहृत
भरद्वाज वचनम् ॥ वृत्तंवाचतुर स्रंवाविंदुमर्द्धेंदुमेव-
वा ॥ ललाटेयाहृणां पुंड्रं लिखेत्त सित भस्मना ॥ तादृशं
भुजयोर्मूर्ध्निस्तनयोश्चांतरे लिखे दिति श्यामं श्वेतंच
पीतं चरक्तं विन्दु समा लिखेत् ललाटादिषु पुंड्रेषु संप्र
दायान रोधत इति ॥ श्यामः श्वेतश्च विन्दुः श्री मन्नि-

वादित्या चार्यानु यायिनाम् श्रीमद्विष्णु स्वामि संप्रदा
यानु यायिनाम॥ श्रीमद्धित हरि वंशाचार्या नु यायिना
ञ्च श्वेतोविंदुः श्रीमद्राम प्रसादा चार्यानु यायि नाम
रक्तः पीतश्च श्रीमद्रामस खेंद्र निध्या चार्यानुयायि
नाम भस्म मयो विन्दु वृष्णि चारितां भस्म मय मूर्ध्वपुं
ड्रंच॥याज्ञिकानाम्॥ श्रीमन्मध्वा चार्य संप्रदायानु
यायि नांच स्वस्व संप्रदायानु रोधतो ललाटादिपुंड्रे
षु श्यामादि विन्दुं लिखेत्॥येनास्य पितरोयाता ये
नयाताः पितामहाः॥ तेनयाया त्सतांमार्गंगच्छं स्तत्र
नदोषभागि तिमनुवचनात्॥ शाखांशिखांच पुंड्रंच
समयाचार मेवच॥ पूर्वैराचरितं कुर्यादन्यथा पतितोभ
वेदिति विधान पारिजातो दाहृत विष्णुस्मृति वचनाच्च
हेमाद्रि मदन प्रदीप मदन पारि जात कल्पतरु विधान
पारिजातानूप विलासादि निवंधेषु तिलक विधाय का-
निमनु विष्णुशातातप स्मृत्यादि वचनानि दृश्यंते॥इदा
नीं तासु तासुस्मृतिषु तानि तानि वचनानि न दृश्यंतेता
निकल्पित स्व पक्ष रक्षणाय धूर्तैर्निः सारितानीत्य नुमा
तव्यम् यतो धर्मभीर्वो ऽन्यथा लेखनाद्य क्षमानि वंध -
काराः कथं तत्तद्वचन मुदाहरं तिस्म इतिश्री सीताराम
कृपापात्र सीतारामीय परमहंसपरि व्राजकहरि हरप्रसा
द विरचित स्तिलक तत्व भास्करः समाप्तः॥ ॥

श्रीगणेशायनमः

सर्वस्वामीनित्यलक्ष्मः स्वतंत्रः सर्व कारणाम पश्च भक्तपराधी
नस्तंरामं प्रणमाम्यहम् १ निषादा धिपतिं नत्वा सुग्रीवंच
विभीषणं॥कुर्वैवैष्णव तत्वस्य भास्करंसाधु तंष्टये २ अथभग
वद्भक्तानां वरिष्ठत्वम् निरूप्यंते सौपर्णे कलौभागवत्तं नाम
यस्यपुंसः प्रजायतेजननी पुत्रिणीतेन पितृणांतु धुरंधरः
३ कलौभागवत्तं नामदुर्लभं नैवलभ्यते ब्रह्मरुद्र पदोत्कृष्टं
गुरुणाकथितं मम ४ समीपेतिष्ठते यस्य ह्यंत कालेपिवै-
ष्णवः गच्छते परमं स्थानं यद्यपि ब्रह्महाभवेत् ५ तिष्ठतेग-
च्छते इत्यार्षं स्कांदे सकर्ता सर्वधर्माणां भक्तोयस्तव केशव
सकर्ता सर्वपापानां योनभक्तस्त वाच्युत ७ धर्मोभवत्यधर्मो
पिकृतो भक्तैस्तवाच्युत॥ पापंभवति धर्मोपि तवाभक्तैः
कृतोहरे ८ निःशेषधर्म कर्ता वाप्य भक्तो नरकेहरे॥ सदातिं
ष्ठति भक्तस्ते ब्रह्महापि विशुध्यति ९ निश्चलात्वयिभ-
क्तिर्या सैव मुक्तिर्जनार्दन॥ मुक्ताएवहि भक्तास्ते तववि-
ष्णोयतोहरे १० नूनंभागवतालोके लोक रक्षा विशारदाः
व्रजंतिविष्णु नादिष्टाहृदिस्थेन महामुने ११ भगवानेव स-
र्वत्र भूतानां कृपयाहरिः॥ रक्षणायचरल्लोंकान भक्तरूपे
णानारद १२ यस्तु विष्णु परोनित्यं दृढभक्तिर्जितेंद्रियः स्वगृ
हेपिवसन्याति तद्विष्णोः परमंपदम् १३ अश्वमेध सहस्रा-
णां सहस्रंयः करोतिवै नासौ तत्फल माप्नोति त्वद्भक्तैर्यद

वाप्यते १४ सर्वत्रवैस्नवाः पूज्याःस्वर्गे मर्त्ये रसातले॥ देवतानां
मनुष्याणांतथै वोरगरक्षसां १५ येषां श्रवणमात्रेण पापंलक्ष
शतानिच॥ दह्यंते नात्रसंदेहो वैस्नवानां महात्मनां १६ येषां
पादरजे नैवप्राप्यते जान्हवीजलम्॥ नार्मदं यामुनं चैवकिं
पुनः पादयोर्जलं १७ येषांवाक्य जलौघेन विनागं गाजलैर-
पि॥ विनातीर्थ सहस्रेण स्नातोभवतिमानवः १८ तावद्भ्रमं-
तिसंसारे पितरः पिंडतत्पराः॥ यावत्कुलेभक्तियुक्तः सुतोनै-
वप्रजायते १९ सएव ज्ञानवांल्लोके योगिनांप्रथमोहिसः॥म-
हात्मतू नामाहतो हरिभक्ति युतोहियः २० काशीखंडे ध्रुवच
रिते नच्यवंतेहियद्भक्ता महात्यां प्रलयां पदिस्सतो च्यु तोखिल-
लेलोके सएवधर्मगोव्ययः २१ नतस्माद्भगवद्भक्ताद् भेतव्यंक
नचित् क्वचित् नियतावस्नु भक्ता येनतेस्तुः परितापिनः २२
महाभारते राजधर्मे॥ ईश्वरं सर्वभूतानांजगतः प्रभवाप्ययं
भक्तानारायणं देवं दुर्गाण्य तितरंत्तिते २३ नारायण मित्य
त्रषष्ट्यर्थे द्वितीया नारायणस्य भक्ताइत्यर्थः दुर्गाणि दु-
स्तरविविधदुःखानि विस्नुधर्मोत्तरे शयना दुत्थितो यस्तु-
कीर्त्तयेन्मधुसूदनम् कीर्त्तनात्तस्य पापानि नाशं मायां
त्यशेषतः २४ यस्याप्यनंते जगतामधीशे भक्तिः परायादव
देवदेवे तस्मात्परं नापरमस्तिकिंचित् पात्रंत्रिलोके पुरुषप्र
वीर २५ द्वारकामाहात्म्ये प्रल्हाद बलिसंवादे नित्यंयेप्रा-
तरुत्थाय वैस्नवानांतु कीर्त्तनं कुर्वंतिते भागवताः कृष्ण

तुल्याः कलौवले २६ इतिहास समुच्चये येभजंति जगद्यो
निं वासुदेवं सनातनम् नतेभ्योविद्यते तीर्थम धिकं राज
सत्तम २७ यत्रभागवताः स्नानंकुर्वंति विमलाशयाः त
त्तीर्थ मधिकं विद्धि सर्व पाप विशोधनम् २८ यत्ररागादि
रहिता वासुदेव परायणाः तत्र संनिहितो विष्णु र्नृपते-
नात्रसंशयः २९ नगंधैर्न तथात्तो यैर्न पुष्पैश्च मनोहरैः
सान्निध्यं कुरुते देवो यत्र संतिन वैष्णवाः ३० वलिभि-
श्चोप वासैश्च नृत्यगीता दिभिस्तथा नित्यमाराध्यमा
नोपि तत्र विष्णुर्न तृप्यति ३१ तस्मादेते महाभागावैष्ण
वावीत कल्मषाः पुनंति सकलांल्लोकांस्तत्तीर्थ मधिकं
ततः ३२ तदित्यव्ययंते इत्यर्थे तेन वैष्ण वा एवपरंतीर्थ
मितिये नृशंसा दुरात्मानः पापाचाररताः सदा॥ तेपियां
तिपरं धाम नारायण पराश्रयाः ३३ लिप्यंते नच पापेनवै
ष्णवा विष्णु तत्पराः पुनंति सकलां ल्लो कान्सहस्रांशु
रिवोदितः ३४ जन्मांतर सहस्रेषु यस्यस्या द्बुद्धिरी दृशी
दासोहं वासुदेवस्य सर्वांल्लोकान्स मुद्धरेत ३५ सयाति
विष्णुसालोक्यं पुरुषो नात्र संशयः॥ किंपुनस्त द्गतप्रा-
णाःपुरुषाः संयतेंद्रियाः ३६ श्रीभागवते प्रथम स्कंधे
येषांस स्मरणात्पुंसां सद्यः शुध्यंतिवै गृहाः किंपुनर्द
र्शनस्पर्श पादशौ चासनादिभिः ३७ द्वितीये किरात
हूणांध्रपुलिंद पुष्कसाआभीरकं कायवनाःखसादयः

अन्येच पापायदुपाश्र याश्रयात शुद्धंति तस्मै प्रभविष्णवेनमः
३९ तृतीयस्कंधे श्रुतस्य पुंसां सुचिर श्रमस्य नन्वंजसा सूरि
भिरीडितोऽर्थः तत्तद्गुणानु श्रवणां मुकुंद पादारविंदं हृदयेषु
येषाम् ३९ नकर्हिचिन्मत्पराः शांतिरूपेनं क्ष्यंतिनो निमिषो
लेढि हेतिः येषामहं प्रिय आत्मा सुतश्च सखा गुरुः सुहृदोदै
वमिष्टं ४० चतुर्थेया निर्वृतिस्तनु भृतांतव पाद पद्मध्याना
द्भवज्जन कथा श्रवणेन वास्यात॥साब्रह्मणि स्वमहिमन्य
पिनाथमाभूत्किं त्वंतकासि लुलितात्पततां विमानात्
४१ स्वधर्म निष्ठः शतजन्मभिः पुमान्विरंचितामे तिततःप
रंहिमाम अव्याकृतं भागवतोथ वैष्णवं पदं यथाहं विबुधाः
कलात्यये ४२ पंचमे रहूगणै तत्तपसानयाति नचेज्ययानि
र्वपणा द्गृहाद्वा नछंदसानै वजलाग्नि सूर्यैर्विनामहत्पाद
रजोभिषेकम् ४३ षष्ठे रजोभिः समसंख्याताः पार्थिवैरिहजं
तवः तेषांयेकेचनेहंते श्रेयोवैमनुजादयः ४४ प्रायोमुमुक्षव
स्तेषांकेचनैवद्विजोत्तमाः मुमुक्षूणां सहस्रेषु कश्चिन्मुच्ये
तसिध्यति ४५ मुक्तानामपिसिद्धानां नारायणपरायणः
सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ४६ नारायणपराः
सर्वेन कुतश्चन बिभ्यति स्वर्गापवर्ग नरकेष्वपितुल्यार्थद
र्शिनः ४७ सप्तमेनैषांमतिस्तावदुरुक्रमांघ्रिं स्पृशत्यनर्था
पगमोयदर्थः महीयसां पादरजोभिषेकं निष्किंचनानां
नवृणीतयावत ४८ विप्राद्द्विषड्गुण युतादरविन्दनाभपा

पादारविंद विमुखात् श्वपचं वरिष्ठं मन्येतदर्पितमनोवचनेहि
तार्थप्राणं पुनाति सकुलं नतु भूरिमानः ४९ षष्ठमे एकांतिनो
यस्य न किंचनार्थं वांछंति ये वै भगवत्प्रपन्नाः॥ अत्यद्भुतं य
च्चरितं सुमंगलं गायंत आनंद समुद्र मग्नाः ५० नवमे अहं भ
क्त पराधीनो ह्यस्वतंत्र इव द्विज साधुभिर्ग्रस्त हृदयो भक्तै
र्भक्तजनप्रियः ५१ नाहमात्मा न माशासे मद्भक्तैः साधुभि
र्विनाश्रियं चात्यंतिकीं ब्रह्मन् येषां गतिरहं परा ५२ ये दारा
गार पुत्राप्तान प्राणान्वित्तमिमं परम् हित्वा मां शरणं या
ताः कथं तांस्त्यक्तुमुत्सहे ५३ मयि निर्बद्ध हृदयाः साधवः
समदर्शिनः वशे कुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं यथा ५४
साधवो हृदयं मह्यं साधूनां हृदयं त्वहम् मदन्यं ते न जानंति
नाहं तेभ्यो मनागपि ५५ दुष्करः को नु साधूनां दुस्त्यजो वा
महात्मनाम् यैः संगृहीतो भगवान्सात्वतामृषभो हरिः ५६
यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः तस्य तीर्थपदः
किं वा दासानामवशिष्यते ५७ दशमे तथा न ते माधव ताव-
काः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्ध सौहृदाः त्वयाभिगुप्ता विच
रंति निर्भया विनायकानीकपमूर्द्धसु प्रभो ५८ नायं सुखापो भ
गवान्देहिनां गोपिकासुतः॥ ज्ञानिनां चात्मभूतानां यथा भ
क्तिमतामिह ५९ साधूनां समचित्तानां सुतरां मत्कृतात्मनां दर्श
नान्नो भवेद्बंधः पुंसोऽक्ष्णोः सवितुर्यथा ६० न ह्यम्मयानि तीर्था
नि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादेव साधवः

६१ अग्निर्न सूर्यो नच चंद्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्म
नः उपासिता भेदकृतो हरंत्यघं विपश्चितो घ्नंति मुहूर्त्तसेवया
६२ यस्यात्मबुद्धिः कुणपे त्रिधातुके स्वधीः कलत्रादिषु भौम इ
ज्यधीः यत्तीर्थबुद्धिः सलिले न कर्हिचिज्जनेष्वभिज्ञेषु स एव
गोखरः ६३ तव परिये चरंत्यखिलसत्वनिकेततया तउत प
दाक्रमंत्यविगणय्य शिरोनिर्ऋतेः परिवयसे पशूनिव गि
राविबुधानपि तांस्त्वयि कृतसौहृदाः खलु पुनंति न ये विमु-
खाः ६४ एकादशो भूतानां देव वर्त्तितं दुःखाय च सुखाय च सुख
यैव हि साधूनां त्वादृशामच्युतात्मनाम् ६५ भजंति ये यथा देवा
न्देवा अपि तथैव तान् छायेव कर्म सचिवाः साधवो दीनवत्स
लाः ६६ नमएकांतभक्तानां गुणदोषोद्भवा गुणाः साधूनां स-
मचित्तानां बुद्धेः परमुपेयुषां ६७ यथोपश्रयमाणस्तु भगवंतं वि
भावसुम् शीतं भयं तमोऽप्येति साधून्संसेवतस्तथा ६८ निम-
ज्योन्मज्जतां घोरे भवाब्धौ परमायनम् संतो ब्रह्मविदः शां
ता नौर्दृढेवाप्सु मज्जताम् ६९ अन्नं हि प्राणिनां प्राण आर्तानां
शरणं त्वहम् धर्मो वित्तं नृणां प्रेत्य संतोऽर्वाग्बिभ्यतोऽरणम्
७० संतो दिशंति चक्षूंषि बहिरर्कः समुत्थितः देवता बांधवाः संतः
संत आत्माहमेव च ७१ न किंचित्साधवो धीरा भक्ता ह्येकांतिनो
मम वांछंत्यपि मया दत्तं कैवल्यमपुनर्भवम् ७२ द्वादशोन्त्वा॥ नह्य
द्भुतमिदं मन्ये महतामच्युतात्मनाम् अज्ञेषु तापतप्तेषु भूते
षु यदनुग्रहः ७३ श्रवणाद्दर्शनाद्वापि महापातकिनोऽपि

१पिवः शूद्रान्नं त्यज श्वापि किमुसं भाषणादिभिः ७४ ना-
रदीये श्रीवामदेव रुक्मांगद संवादे श्वपचोपि महीपाल वि-
ष्णोर्भक्तो द्विजाधिकः॥ विष्णुभक्ति विहीनो योय तिश्च श्वपचा-
धिकः ७५ स्कांदे रेवाखंडे श्रीब्रह्मोक्तौ इंद्रोमहेश्वरो ब्रह्मा परं
ब्रह्मतदेव हिश्वप चोपि भवत्येव यदा तुष्टोसि केशव॥७६
यदा तुष्टोसि तदैवश्वपचो पींद्रा दिर्भवति तत्र परं ब्रह्मे-
ति मुक्तस्तन्मयो वेत्यर्थः॥७७॥काशीखण्डे ब्राह्मणाः क्ष-
त्रियो वैश्यः शूद्रो वायदि वेतरः॥ विष्णु भक्ति समायुक्तो
ज्ञेयः सर्वोत्तमोत्तमः॥७८॥ इतिहास समुच्चये॥ शूद्रं वाभ-
गवद्भक्तं निषादं श्वपचं तथा॥ वीक्षते जाति सामान्यात् स
याति नरकं ध्रुवम्॥७९॥ तत्रैव भगवद्वाक्यम्॥ नमेप्रिय
श्चतुर्वेदी मद्भक्तः श्वपचः प्रियः तस्मैदेयं ततो ग्राह्यं सवै
पूज्यो यथा ह्यहम्॥८०॥ द्वारका माहात्म्ये॥ प्रह्लाद ब-
लिसंवादे॥ संकीर्णयो नयः पूताये भक्ता मधुसूदने॥
म्लेच्छ तुल्याः कुलीनास्ते येन भक्ता जनार्दने॥८१॥
आदि पुराणे॥ नाम युक्ता जनाः के विज्ञात्यं तरस-
मन्विताः॥ कुर्वंति मे यथा प्रीतिं न तथा वेद पारगाः
॥८२॥ पाद्मे॥ माघ माहात्म्ये॥ श्वपाकमिव नेक्षे-
तलोके विप्रम वैष्णवम्॥ वैष्णवो वर्णा वाह्योपि पुना-
ति भुवन त्रयम्॥८३॥ नशूद्रा भगवद्भक्ता स्तेतु भागव-
ता मताः सर्व वर्णेषुते शूद्रायेन भक्ता जनार्दने ८४ ब्रह्मांडपुराणे

दर्शन स्पर्शना लाप सह वासा दिभिः द्रातत्भक्ताः
पुनन्ति कृष्णस्य सख्याद् पिच पुष्कसम् ॥८५॥
इतिश्री सीताराम कृपा पात्र सीता रामीय परम हं-
स परि व्राजक हरि हर प्रसाद विरचितो वै-
ष्णव तत्वभास्करः

## समाप्तः